**क्लीत** पु० सुश्रुतोक्ते अग्निप्रकृतिके कीटभेदे । "क्लीतः क्रमिसरारी च" सुश्रुतः कीटशब्दे विवृतिः

**क्लीतक** न० क्लीव-क्विप् नि०वलोपः क्लियं तकति हसते अच् । मधूके (यष्टिमधु) । अमरः । "तत्र क्लीतकाश्वमारगुञ्जासुगन्धगर्गरककरघाटविद्युद्दिवाविजयानीत्यष्टौ मूलविषाणि" सुश्रुतः । २करञ्जवीजे "आत्मनि मन्त्रान् संनमयेत्" "एकक्लीतकेन" आश्व० गृ० १,८,७,८, "करञ्जवीजस्य यत्रैकं वीजं तदेकक्लीतकम्" नारा० वृ० ।

**क्लीतकिका** स्त्री क्लीतादागतः कन् क्लीतकः विक्रयः निन्दायां ठन् रस्य लः । नीलप्रामोषधौ अमरः । नीलप्राः विक्रयस्य निनिन्दितत्वमाह मिता० आपस्तम्बः "रोमकूपे यदा गच्छेद्रसो नीलप्रास्तु कस्यचित् । त्रिवर्णेषु च सामान्यात्तप्तकृच्छ्रं विशोधनम् । पालनं विक्रयश्चैव तद्वृत्त्या चोपजीवनम् । पतनञ्च भवेद्विप्रे त्रिभिः कृच्छ्रैर्व्यपोहति"

**क्लीतनक** न० क्लीतं कीटभेदं नुदति नुद—बा० ड संज्ञायां कन् । मधूलिकायाम् अतिरसायाम् राजनि० ।

**क्लीब(व)** वैकल्ये अप्रागल्भ्ये च भ्वा० आत्म० अक० सेट् । क्लीब(व)ते अक्लीबि(वि)ष्ट । चिक्लीबे(वे) क्लीबि(वि)त्वा । पा० मते अयं पवर्गान्त्यः कविक० मते अन्त्यस्थान्त्यः । ऋदित् चङि अचिक्लीब(व)त् त ।

**क्लीब(व)** पु० न० । क्लीब(व)—क । पुंस्त्रीभिन्ने तृतीयप्रकृतौ षण्डे । स च "न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति । मेढ्रं चोन्मादशुक्राभ्यां हीनः क्लीवः स उच्यते" इति कात्यायनोक्तलक्षणः । स च चतुर्दशविधः नारदेन दर्शितो यथा ।

"चतुर्दशविधः शास्त्रे षण्डो दृष्टो मनीषिभिः । चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् । निसर्गषण्डो१ ऽनण्डश्च २पक्षषण्ड ३स्तथैव च । अभिशापाद् गुरो ४रोगात् ५देवक्रोधात् ६तथैव च । ईर्ष्याषण्डश्च ७स्तथाऽऽसेक्यो ८वातरेता ९मुखेभगः१० । आक्षिप्त ११मोघवीजश्च १२शालीनो १३ऽन्यापति १४स्तथा । तत्राद्यावप्रतीकार्यौ पक्षाख्यं माससमाचरेत् । अनुक्रमात्त्रयस्याथ कालः संवत्सरः स्मृतः । ईर्ष्याषण्डादयोयेऽन्ये चत्वारः समुदाहृताः । त्यक्तव्यास्ते पतितवत् क्षतयोन्या अपि स्त्रियाः । आक्षिप्तमोघवीजाभ्यां कृतेऽपि पतिकर्मणि । पतिरन्यः स्मृतोनार्य्या वत्सरार्द्धं प्रतीक्ष्य तु । शालीनस्यापि धृष्टस्त्रीसंयोगाद्भ्रंशयेत् ध्वजः । तं हीनवेगमन्यस्त्रीबालाद्याभिरुपाचरेत् । अन्यस्यां यो मनुष्यः स्यादमनुष्यः स्वयोषिति । लभेत स्वाम्यं भर्त्तानोएतत्कार्य्यं प्रजाकृते । अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं वीजिनो नराः । क्षेत्रं वीजवते देयं सवीजी क्षेत्रमर्हति" अत्र "नष्टे मृते प्रव्रजिते क्लीवे वा पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते" इति क्लीवपतिपरित्यागे प्राप्ते क्लीवस्य चिकित्स्याचिकित्स्यत्वभेदेन द्वैविध्यमुक्त्वा चिकित्स्यस्य कालविशेषपर्य्यन्तं सुश्रुताद्युक्तवाजीकरणादिना उपचर्य्यता अचिकित्स्यस्य तु सर्वथा त्याज्यता दर्शिता । तत्र निसर्गषण्डः मनूक्तो मातापित्रोः समवीर्य्यजातः । अनण्डः अण्डहीनः छिन्नाण्डः कृतक्लीवश्च तौ द्वौ अप्रतीकार्य्यौ अचिकित्स्यौ । पक्षाख्यं पक्षव्यापकषण्ढं माससमाचरेत् चिकित्सेत् । त्रयस्य गुरोरभिशापरोगदैवकोपकृतकक्लैव्यस्य संवत्सरं चिकित्स्यत्वम् । ईर्ष्याषण्डादयस्तु चत्वारः अचिकित्स्यत्वात् पतिततुल्यत्वेन सर्वथा त्याज्याः न तत्र कालप्रतीक्षा । आक्षिप्ता वीजस्य ईषत्क्षेप्ता दर्शनमात्रादिना स्खलितवीर्य्यः मोघवीर्य्यः अपत्योत्पादनायोग्यवीजः एतौ द्वौ षण्मासं चिकित्स्यौ शालीनस्य तु चिकित्स्यत्वेन अत्याज्यता । अन्यपतेस्तु सर्वथा त्याज्यता । अत्र क्षतयोन्या इति विशेषणात् क्लीवपतित्यागवचनं वाग्दत्ताविषयमिति कल्पनं निरस्तम् । नष्टे मृतेइत्यादिवचनं युगान्तरविषयम् "दत्तायाश्चैव कन्यायाः पुनर्दानं वरस्य च" इत्यादित्यपुराणे कलिवर्ज्यधर्म्मेष्वभिधानात् इति माधवाचार्य्याः । अन्ये तु कलिधर्म्मप्रकरणे पराशरेण तथाविधानात् स्मृतेः पुराणात् बलवत्त्वेन कलावपि तत्प्रवृत्तिरित्याहुः । साम्प्रदायिकास्तु वेदार्थानुभवजन्यमुनिप्रणीतवाक्यस्यैव स्मृतित्वेन पुराणान्तर्गतधर्म्मविधायकनिषेधवाक्ययोरपि स्मृतित्वात् "द्वैधे बहूनां वचनमिति" न्यायेन बहूनां तथासम्मत्यभावात् शिष्टाचारविरोधाच्च पराशरवाक्यमनादृत्य बहुसम्मत एव पक्ष आदरणीय इत्याहुः । ईर्ष्याषण्डादिलक्षणं सुश्रुतोक्तम् । सुश्रुते तु नपुंसकोत्पत्तिकारणसहितास्तद्भेदा अन्यथा दर्शिता यथा

"पित्रोरत्यल्पवीजत्वादासेक्यः पुरुषो भवेत् । स शुक्रं प्राश्य लभते ध्वजोच्छ्रायमसंशयम् । यः पूतियोनौ जायेत स सौगन्धिकसंज्ञितः । स योनिशेफसोर्गन्धमाघ्राय लभते बलम् । स्वे गुदेऽब्रह्मचर्य्याद्यः स्त्रीषु पुं-